# Yoga Turned on Its Head

YDYS Conference, Hamburg, May 22nd, 2024

*James Mallinson (University of Oxford)*

Handout

## 1 *Śrīnāthatīrthāvalī* 49c–62b

इतो ऽन्तिके कच्छनामा देशो ऽस्ति लोकविश्रुतः ॥४९॥
ग्रामो धीनोधरस्तत्रप्रसिद्धस्तत्र सिद्धराट् ।
चतुरशीतिसंख्याकं पट्टनं दाहयन् पुरा ॥५०॥
आद्वादशाब्दान्मूर्ध्नो ऽधो न्यस्य पूगफलं भुवि ।
ऊर्ध्वपादः कपालाख्यमासनं विदधत्तपः ॥५१॥
धूर्मनाथस्ततापोग्रं निश्चलाङ्गो ऽतिदुष्करम् ।
ततस्तत्तपसा भीतश्चकम्पे मघवानपि ॥५२॥
श्रीनाथस्तमुवाचाथ कृपया दत्तदर्शनः ।
तपो बहुकृतं वत्स तस्माद्विरम साम्प्रतम् ॥५३॥
धूर्मनाथस्ततो नाथं नत्वा स्तुत्वाब्रवीद्वचः ।
नाथ ज्वालाकुले द्रष्टुमक्षमे मम लोचने ॥५४॥
यत्र यत्र निपततस्तत्तद्भस्म भवेत्क्षणात् ।
इत्याकर्ण्य वचस्तस्य श्रीनाथः करुणाम्बुधिः ॥५५॥
चरणौ मामकौ पश्य वत्सेत्याह तपस्विनम् ।
स ततो नाथपादाब्जे भ्रमरीकृतवान् दृशौ ॥५६॥
गोचरीकृत्य पादाब्जे पुनर्दृष्टिरगात्पुरः ।
ततो द्वादशगव्यूत्या शुष्कीकृत्य महोदधिम् ॥५७॥
बभूवतुर्ज्वालहीने दृष्टी पीयूषवर्षणे ।
ततस्तत्रैव शैलेन्द्रोपरि सुन्दरमन्दिरे ॥५८॥
धूर्मनाथो महासिद्धः प्रोषिवान् शुभमूर्तिमान् ।
एवं तस्यास्ति हुतभुग् धूपनी पाप्मधूपनी ॥५९॥
चतस्रस्तत्र देगाख्याः पाकस्थाल्यश्च सन्ति हि ।
ख्यातास्ता यमुनागङ्गासरस्वत्यादिनामतः ॥६०॥
इतः पञ्चदशक्रोशे ठाणाग्रामो ऽस्ति दक्षिणे ।

राजते धूर्मनाथस्य मन्दिरं तत्र सुन्दरम् ॥६१॥
विलसत्कुन्तलस्तत्र कपालो ऽद्यापि राजते ।
तद्ग्रामग्रामयोर्मध्ये नदी वहति सर्वदा ॥६२॥

## 2 Hemacandra's *Yogaśāstra* 4.124-136, with his *Svopajñavṛtti*

Text from *Yogaśāstra* and *Svopajñavrtti* of Hemacandra, ed. Muni Jambuvijaya, 3 Vols., Bombay, Jain Sāhitya Vikāsa Maṇḍala, 1971, 1981 and 1986.

अथासनान्येवाह ।।

पर्यङ्कवीरवज्राब्जभद्रदण्डासनानि च ।
उत्कटिका गोदोहिका कायोत्सर्गस्तथासनम् ।।१२४।।

पर्यङ्कादिषु प्रत्येकमासनशब्दः संबध्यते ।।१२४।।

क्रमेणासनानि व्याचष्टे

स्याज्जङ्घयोरधोभागे पादोपरि कृते सति ।
पर्यङ्को नाभिगोत्तानदक्षिणोत्तरपाणिकः ।।१२५।।

जङ्घयोरधोभागे पादोपरि कृते सति पाणिद्वयं नाभ्यासन्नम् उत्तानं दक्षिणोत्तरं यत्र दक्षिण उत्तर उपरिवर्ती यत्र तत्तथा एतत्पर्यङ्को नाम शाश्वतप्रतिमानां श्रीमहावीरस्य च निर्वाणकाले आसनम् यथा पर्यङ्कः पादोपरि भवति तथायमपीति पर्यङ्कः । "जानुप्रसारितबाहोः शयनं पर्यङ्कः" इति पातञ्जलाः ।।१२५।।

अथ वीरासनम्

वामोंऽह्रिर्दक्षिणोरूर्ध्वं वामोरूपरि दक्षिणः ।
क्रियते यत्र तद्वीरोचितं वीरासनं स्मृतम् ।।१२६।।

---

J = Jodhpur Maharaja Man Singh Pustak Prakash MS 1647B ff. 2v–3r • C = *Śrīnāthatīrthāvalī*, ed. Yogī Śaṅkarnāth Jī, Curu (Rajasthan), Samvat 2007

---

**50ab** grāmo dhīnodharas tatra prasiddhas tatra ] J; dharaṇīdharanām āste grāmo yatrāsti C **57b** agāt ] J; aṇāt C **60ab** degākhyāḥ pākasthālyaś ca ] J; degākhyāḥ tartrādavyāstāḥ C **60b** santi hi ] C; santaki J **61b** ṭhānāgrāmo ] *em.*; rāṇāgrāmo J C

वामोंऽह्रिर्वामपादो दक्षिणोरोरूर्ध्वं वामस्य चोरोरुपरि दक्षिणोंऽह्रिर्यत्र क्रियते तद्वीराणां तीर्थकरप्रभृतीनामुचितं न कातराणां वीरासनं स्मृतम् । अग्रहस्तन्यासः पर्यङ्कवत् । इदं पद्मासनमित्येके । एकस्यैव पादस्य ऊरावारोपणे ऽर्धपद्मासनम् ।।१२६।।

अथ वज्रासनम्

पृष्ठे वज्राकृतीभूते दोर्भ्यां वीरासने सति ।
गृह्णीयात्पादयोर्यत्राङ्गुष्ठौ वज्रासनं हि तत् ।।१२७।।

उक्तस्वरूपे वीरासने सति पृष्ठे वज्राकाराभ्यां दोर्भ्यां पादयोर्यत्राङ्गुष्ठौ गृह्णीयात्तद्वज्रासनम् । इदं वेतालासनमित्यन्ये ।।१२७।।

मतान्तरेण वीरासनमाह

सिंहासनाधिरूढस्यासनापनयने सति ।
तथैवावस्थितिर्या तामन्ये वीरासनं विदुः ।।१२८।।

सिंहासनमधिरूढस्य भूमिन्यस्तपादस्य सिंहासनापनयने सति तथैवावस्थानं वीरासनम् । अन्ये इति सैद्धान्तिकाः कायक्लेशतपःप्रकरणे व्याख्यातवन्तः । पातञ्जलास्त्वाहुः "ऊर्ध्वस्थितस्यैकतरः पादो भून्यस्त एकश्चाकुञ्चितजानुरूर्ध्वमित्येतद्वीरासनम्" (तत्त्ववैशारदी २.४६) इति ।।१२८।।

अथ पद्मासनम्

जङ्घाया मध्यभागे तु संश्लेषो यत्र जङ्घया ।
पद्मासनमिति प्रोक्तं तदासनविचक्षणैः ।।१२९।।

जङ्घाया वामाया दक्षिणाया वा द्वितीयया जङ्घया मध्यभागे संश्लेषो यत्र तत्पद्मासनम् ।।१२९।।

अथ भद्रासनम्

संपुटीकृत्य मुष्काग्रे तलपादौ तथोपरि ।
पाणिकच्छपिकां कुर्याद्यत्र भद्रासनं तु तत् ।।१३०।।

स्पष्टम् । यत्पातञ्जलाः "पादतले वृषणसमीपे संपुटीकृत्य तस्योपरि पाणिकच्छपिकां कुर्यात् । एतद्भद्रासनम् (तत्त्ववैशारदी २.४६) ।।१३०।।

अथ दण्डासनम्

**श्लिष्टाङ्गुली श्लिष्टगुल्फौ भूश्लिष्टोरू प्रसारयेत् ।**
**यत्रोपविश्य पादौ तद्दण्डासनमुदीरितम् ।।१३१।।**

स्पष्टम् । यत्पातञ्जलाः "उपविश्य श्लिष्टाङ्गुलीकौ श्लिष्टगुल्फौ भूमिश्लिष्टजङ्घौ च पादौ प्रसार्य दण्डासनमभ्यसेत्" (तत्त्ववैशारदी २.४६) ।।१३१।।

अथोत्कटिकासनगोदोहिकासने

**पुतपार्ष्णिसमायोगे प्राहुरुत्कटिकासनम् ।**
**पार्ष्णिभ्यां तु भुवस्त्यागे तत्स्याद्गोदोहिकासनम् ।।१३२।।**

पुतयोः पार्ष्णिभ्यां भूमिसंलग्नाभ्यां योगे उत्कटिकासनं प्राहुः यत्र भगवतः श्रीवीरस्य केवलज्ञानमुत्पन्नम् । यदाह

> "जंभियबहि उजुवालिअतीर विसाहसियदसमिपहरतिगे ।
> छट्ठेणोक्कडुअट्ठिअस्स केवलं आसि सालतले ।।" (आवश्यकनिरुक्ति ५२६)

तदेवोत्कटिकासनं गोदोहिकासनं गोदोहकसमाकारत्वात्पार्ष्णिभ्यां भुवस्त्यागे सति । इदं च प्रतिमाकल्पिकादीनां विधेयतयोपदिष्टम् ।।१३२।।

अथ कायोत्सर्गः

**प्रलम्बितभुजद्वन्दमूर्ध्वस्थस्यासितस्य वा ।**
**स्थानं कायानपेक्षं यत्कायोत्सर्गः स कीर्तितः ।।१३३।।**

प्रलम्बितं भुजयोर्द्वन्द्वं यत्र तत्तथा कायानापेक्षं स्थानं स कायोत्सर्गो नामासनमूर्ध्वस्थस्यासितस्य वा । ऊर्ध्वस्थितानां कायोत्सर्गो जिनकल्पिकादीनां छद्मस्थतीर्थकराणां च भवति ते हि ऊर्ध्वजव एवासते स्थविरकल्पिकानां तु ऊर्ध्वस्थितानामासितानां वा उपलक्षणात् शयितानां वा यथाशक्ति भवति कायोत्सर्ग इति स्थानध्यानमौनक्रियाव्यतिरेकेण क्रियान्तरसंबन्धिनः कायस्योत्सर्गस्त्याग इत्य् अर्थः ।

इदं चासनानां दिक्प्रदर्शनमात्रमुक्तमासनान्तराणामुपलक्षणार्थम् तथा हि

आम्रकुब्जासनम् आम्राकारतयावस्थितिः यथा भगवान् महावीर एकरात्रिकीं प्रतिमां श्रितः संगमकसुराधमेन विहितां विंशतिमुपसर्गाणामधिसेहे ।

तथा एकपार्श्वशायित्वं तच्चोर्ध्वमुखस्याधोमुखस्य तिर्यङ्मुखस्य वा भवति ।

तथा दण्डायतशायित्वम् ऋजुकृतशरीरस्य प्रसारितजङ्घोरुद्वयस्य चलनरहितस्य तद्भवति ।

तथा लगण्डशायित्वं मूर्ध्नः पार्ष्ण्योश्च भूमिस्पर्शे शरीरेण च भूमेरस्पर्शे तद्भवति ।

तथा समसंस्थानं यत्पार्ष्ण्यग्रपादाभ्यां द्वयोराकुञ्चितयोरन्योन्यपीडनम् ।

तथा दुर्योधनासनं यद्भूमिप्रतिष्ठितशिरस उत्पादमवस्थानम् । कपालीकरणमिति च प्रसिद्धम् । तस्मिन्नेव यदा जङ्घे पद्मासनीकृते भवतस्तदा दण्डपद्मासनम् ।

तथा स्वस्तिकासनं यत्र सव्यमाकुञ्चितं चरणं दक्षिणजङ्घोर्वन्तरे निक्षिपेत् दक्षिणं चाकुञ्चितं वामजङ्घोर्वन्तरे इति ।।

तथा सोपाश्रयं योगपट्टकयोगाद्यद्भवति ।

तथा क्रौञ्चनिषदनहंसनिषदनश्वनिषदनहस्तिनिषदनगरुडनिषदनादीन्यासनानि क्रौञ्चादीनां निषण्णानां संस्थानदर्शनात्प्रत्येतव्यानि । तदेवं न व्यवतिष्ठते आसनविधिः ।।१३३।।

ततः

**जायते येन येनेह विहितेन स्थिरं मनः ।**
**तत्तदेव विधातव्यमासनं ध्यानसाधनम् ।।१३४।।**

मेदस्विनामितरेषां च बलवतामपरेषां च येन येनासनेन कृतेन सात्म्यविशेषात्स्थिरं मनो जायते तत्तदेवासनं ध्यानसाधनत्वेन विधेयम् । यदाह

> “सव्वास्य वट्टमाणा मुणओ जं देसकालचेट्ठासु ।
> वरकेवलाइलाभं पत्ता बहुसो समिअपावा ।।
> तो देसकालचेट्ठानियमो झाणस्स नत्थि समयम्मि ।
> जोगाण समाहाणं जह होइ तहा पयैअव्वण् ।।” [ध्यानशतके गाथा ४०–४१]

न चैवमासनाभिधानमनर्थकम् प्रतिमाकल्पिकान् प्रत्यासननियमस्याभिधानात् । द्वादशसु भिक्षुप्रतिमासु अष्टम्यां प्रतिमायामासननियमो यथा

"उत्ताणग पासल्ली नेसज्जी वा पि ठाण ठाइत्ता ।
सह उस्सग्गे घोरे दिव्वाई तत्थ अविकंपो ।।" [पञ्चाशके १८.१५]

नवम्यां यथा

"दोच्चा वि एरिस च्चिय बहिआ गामाइआण नवरं तु ।
उक्कड् लंगडसाई दंडाययौ व्व ठाइत्ता ।।" [पञ्चाशके १८.१६]

दशम्यां यथा

"तच्चा वि एव नवरं ठाणं तु तस्स होइ गोदोही ।
वीरासणमहवा वी ठाइज्ज वि अंवखुज्जो उ ।।" [पञ्चाशके १८.१७]

इदानीमासनानां यथा ध्यानसाधनत्वं भवति तथा श्लोकद्वयेनाह

**सुखासनसमासीनः सुश्लिष्टाधरपल्लवः ।
नासाग्रन्यस्तदृग्द्वन्द्वो दन्तैर्दन्तान् असंस्पृशन् ।।१३५।।**

**प्रसन्नवदनः पूर्वाभिमुखो वाप्युदङ्मुखः ।
अप्रमत्तः सुसंस्थानो ध्याता ध्यानोद्यतो भवेत् ।।१३६।।**

सुखं सुखावहं आस्यते ऽनेन आस्ते वानेन तदासनं सुखं च तदासनं च तेनासीनः अनेनासनजयमाह । सुश्लिष्टौ मिलितावधरपल्लवौ यस्य स तथा अनेन प्राणप्रसरनिषेधम् आह । नासाग्रे न्यस्तं दृग्द्वन्द्वं येन स तथा अनेन प्राणजयस्य हेतुमाह । दन्तैरुपरितनैरधस्तनैश्च दन्तानुपरितनानधस्तनांश्चासंस्पृशन् तत्संस्पर्शे हि ध्याननिश्चलता न स्यात् । तथा प्रसन्नं रजस्तमोरहितत्वेन प्रसादवत् भ्रूविक्षेपादिरहितं वदनं यस्य सः तथा । पूर्वाभिमुखो वा उदङ्मुखो वा अनेनानयोर् दिशोः पूज्यत्वमाह । जिनजिनप्रतिमाभिमुखो वा । अप्रमत्तः प्रमादरहितः अनेन मुख्यमधिकारिणमाह । यदाह

"धर्म्यमप्रमत्तसंयतस्य" [तत्त्वार्थसूत्र ९.३७]

शोभनमृज्वायतमूर्त्तिकं संस्थानं शरीरसन्निवेशो यस्य स तथा । एवंविधः सन् ध्याता ध्यानोद्यतो भवेत् ध्याने उद्यच्छेत् ।

नाभिदेशे वसत्येव भास्करो दहनात्मकः ।
अमृतात्मा स्थितो नित्यं तालुमध्ये च चन्द्रमाः ॥११३॥
वर्षत्यधोमुखश्चन्द्रो गृह्णात्यूर्ध्वमुखो रविः ।
ज्ञातव्यं कारणं तत्र येन पीयुषमाप्यते ॥११४॥
ऊर्ध्वं नाभिरधस्तालुरूर्ध्वं भानुरधः शशी ।
करणं विपरीताख्यं गुरुवाक्येन लभ्यते ॥११५॥
त्रिधा बद्धो वृषो यत्र रोरवीति महास्वनः ।
अनाहतं च तच्चक्रं हृदये योगिनो विदुः ॥११६॥
अनाहतमतिक्रम्य चाकृष्टो मणिपूरकात् ।
प्राप्तः प्राणो महापद्मं योगिनाममृतायते ॥११७॥
मूर्ध्नः षोडशपत्रपद्मगलितं प्राणादवाप्तं हठाद्
ऊर्ध्वास्यो रसनां नियम्य विवरे शक्तिं परां चिन्तयेत् ।
उत्कल्लोलकलाजलं च विमलं जीवाकुलं यः पिबेन्
निर्दोषः स मृणालकोमलतनुर्योगी चिरं जीवति ॥११८॥
काकचञ्चुवदास्येन शीतलं शीतलं पिबेत् ।
प्राणं प्राणविधानज्ञो योगी भवति निर्जरः ॥११९॥
रसनां तालुमूले यः कृत्वा प्राणानिलं पिबेत् ।
अब्दार्धेन भवेत्तस्य सर्वरोगपरिक्षयः ॥१२०॥
विशुद्धौ परमे चक्रे धृत्वा सोमकलामृतम् ।
उन्मार्गेण हि तद्याति वञ्चयित्वा रवेर्मुखम् ॥१२१॥
विशब्देन स्मृतो हंसो नैर्मल्यं शुद्धिरुच्यते ।
अतः कण्ठे विशुद्ध्याख्यं चक्रं चक्रविदो विदुः ॥१२२॥
अमृतं कन्दरे कृत्वा नासान्तःसुषिरे क्रमात् ।
स्वयमस्खलितं याति वञ्चयित्वा मुखं रवेः ॥१२३॥
बद्धं सोमकलाजलं यदमलं कण्ठस्थलादूर्ध्वतो
नासान्तःसुषिरेण याति गगनद्वारं ततः सर्वतः ।
ऊर्ध्वास्यो भुवि सन्निपत्य नियतस्तेनाङ्गमाप्लावयेत्
एवं यः कुरुते जितेन्द्रियचयो नैवास्ति तस्य क्षयः ॥१२४॥

ऊर्ध्वजिह्वः स्थितो भूत्वा सोमपानं करोति यः ।
मासार्धेन न सन्देहो मृत्युं जयति योगवित् ॥१२५॥
सम्पीड्य रसनाग्रेण राजदन्तबिलं महत् ।
ध्यात्वामृतमयीं देवीं षण्मासेन कविर्भवेत् ॥१२६॥
बद्धमूर्ध्वबिलं येन नव बद्धानि तेन हि ।
न मुञ्चन्त्यमृतं क्वापि त्रिपथाचन्द्रमाकलाः ॥१२७॥
चुम्बन्ती यदि लम्बिकाग्रमनिशं जिह्वा रसस्यन्दिनी
   सक्षारा कटुकाथ दुग्धसदृशा मध्वाज्यतुल्याथवा ।
व्याधीनां हरणं जरापहरणं शास्त्रागमोदीरणं
   तस्य स्यादमरत्वमष्टगुणितं सिद्धाङ्गनाकर्षणम् ॥१२८॥
अमृतापूर्णदेहस्य योगिनो द्वित्रिवत्सरात् ।
ऊर्ध्वं प्रवर्तते रेतस्त्वणिमादिगुणोदयः ॥१२९॥
नित्यं सोमकलापूर्णं शरीरं यस्य योगिनः ।
तक्षकेनापि दष्टस्य विषं तस्य न पीडयेत् ॥१३०॥
इन्धनानि यथा वह्निस्तैलवर्तीव दीपकः ।

तथा सोमकलापूर्णं देही देहं न मुञ्चति ॥ १३१ ॥

**113–114** *Yogacintāmaṇi* p. 142 **115** *Haṭhapradīpikā* 3.74 **118** = *Haṭhapradīpikā* 3.47 **119** ≈ *ŚS* 3.81 **120ab** cf. *Kaulajñānanirṇaya* 14.19ab rasanā tālumūle tu kṛtvā vāyuṃ pibec chanaiḥ **121, 123–4** *Yogacintāmaṇi* pp. 142–3 **125** = *Haṭhapradīpikā* 3.41 **126cd** ≈ *Śivasaṃhitā* 3.84cd **128** = *Haṭhapradīpikā* 3.48 **130-131** = *Haṭhapradīpikā* 3.42-43

**113a** °deśe ] °madhye T • vasaty eva ] V; vahaty eko A, vasaty eṣa T, vasaty eko $G_BG_L$, ca saṃtyakto $G_P$, sthito nityaṃ *Y* **113d** °madhye ] °mūle G • ca candramāḥ ] V; tu candramāḥ AT$G_L$, °ṣu caṃdrakaḥ $G_B$, tu caṃdramā $G_P$ **114b** gṛhṇāty ] V; grasaty T$G_BG_P$*Y*, grahaty $G_L$ **114c** jñātavyaṃ kāraṇaṃ tatra ] VAT$G_B$; jñātavyaṃ karaṇaṃ tatra $G_LG_P$, karaṇaṃ tac ca kartavyaṃ *Y* **115a** ūrdhvaṃ ] VAT$G_B$*H*; ūrdhva° $G_LG_P$$H_{vl}$ **115b** ūrdhvaṃ ] VT*H*; ūrdhva° A$G_LG_P$$H_{vl}$, ūrdhvo $G_B$ **115c** karaṇaṃ viparītākhyaṃ ] $G_BG_L$$H_{vl}$; karaṇaṃ viparītākṣaṃ V, karaṇī viparītākhyā $G_P$*H*, kāraṇī viparītākhyāṃ A, kāraṇaṃ viparītākhyaṃ T **116b** roravīti ] $G_P$; rauravīti *cett.* **117b** cākṛṣṭo maṇipūrakāt ] T; cākṛṣya maṇipūrakāt, VA, cākramya maṇipūrakam $G_BG_L$, cākarṇya maṇipūrakam $G_P$ **117c** prāptaḥ prāṇo ] VT; prāpte prāṇe AG **117d** yoginām amṛtāyate ] VT; yogitam upajāyate A, yogitvam amṛtāyate G **118a** mūrdhnaḥ ] VT$G_P$*H*; mūrdhnā A, ūrdhvaṃ $G_B$, ūrdhva° $G_L$, ūrdhvaḥ $H_{vl}$, mūrddha $H_{vl}$ • °padma° ] VG*H*; °madhya° $H_{vl}$ • avāptaṃ ] ivāptaṃ A **118b** niyamya vivare śaktiṃ ] VT*H*; nidhāya vivare śaktiṃ A, vidhāya vidhivac chaktiṃ $G_B$, nidhāya vidhivac chaktiṃ $G_LG_P$, vidhāya vivare śaktiṃ $H_{vl}$, ca yāmyavivare śaktiṃ $^{vl}$ **118c** utkallolakalājalaṃ ] *H*; utkallolakalākalaṃ V, utkallolajalākulaṃ $T_{vl}$A$H_{vl}$, utkallolajalāmṛtaṃ T, tat kallolakalājalaṃ $G_BG_L$$H_{vl}$, tat kallolajalākulaṃ $G_P$ • ca vimalaṃ jīvākulaṃ ] VA$T_{vl}$, suvimalaṃ jīvākulaṃ T, suvimalaṃ jihvākulaṃ $G_B$, ca vimalaṃ jihvākulaṃ $G_L$, suvimalaṃ dhārājalaṃ $G_P$, ca vimalaṃ dhārāmṛtaṃ *H*, ca vimalaṃ dhārāmayaṃ $H_{vl}$, suvimalaṃ dhārāmṛtaṃ $H_{vl}$ **118d** °tanur ] VA*H*; °vapur TG **119b** śītalaṃ śītalaṃ ] VA$T_{vl}$; śītalaṃ salilaṃ TG **119c** prāṇaṃ prāṇavidhānajño ] VA; prāṇāpānavidhānajño T, prāṇāḥ prāṇavidhānajño $T_{vl}$, prāṇāyāmavidhānena $G_BG_P$, prāṇāpānavidhānena $G_L$ **120a** rasanāṃ tālumūle yaḥ ] *conj.*; rasanātālumūlena *codd.* **120b** kṛtvā prāṇānilaṃ ] *conj.*; yaḥ prāṇam anilaṃ V$G_BG_L$, yaḥ prāṇaṃ satataṃ AT$G_P$ **120d** sarvarogaparikṣayaḥ ] VT; sarvarogavinirgamaḥ A, sarvarogasya saṃkṣayaḥ $G_BG_L$, sarvāṃgaṃ susthiraḥ kriyā $G_P$ **121a** viśuddhau ] V; viśuddha A, viśuddhe TG*Y* **121c** unmārgeṇa hi tad ] V; unmārgeṇa kṛtaṃ A, tanmārgeṇa tu saṃ° T, unmārgeṇa hṛtaṃ $G_BG_P$, unmārgeṇa hi taṃ $G_L$, tanmārgeṇāmṛtaṃ *Y* **121d** raver mukham ] V; mukhaṃ raveḥ ATG*Y* **122a** haṃso ] haṃsas T **122b** nairmalyaṃ ] AG; nirmalyaṃ V$T_{vl}$, tanmadhyaṃ T **122c** viśuddhyā° ] VT; viśuddhā° AG **123a** kṛtvā ] dhṛtvā A, jihvā $G_P$ **123b** nāsāntaḥsuṣire kramāt ] *em.*; nāsāntasuṣire kramāt T$G_B$, nāsāṃtaṃ śuṣire kramāt V, nāśāgraśuṣireṇa tu A, nāsāgraṃ sukhire kramāt $G_LG_P$, nāsāntaṃ śikhare kramāt *Y* **123c** svayam askhalitaṃ ] VT$G_LG_P$; svayaṃ saṃcalitaṃ A, svamārge skhalitaṃ G, svayam uccālito *Y* **123d** vañcayitvā ] VAT*Y*; varjayitvā G **124a** baddhaṃ ] baddhvā AT • °jalaṃ ] ATG*Y*; °malaṃ V • yad amalaṃ ] V; ca vimalaṃ A, suvimalaṃ TG, ca vimala° *Y* **124c** niyatas tenāṅgam āplāvayed ] V; nirāṃm uttānamātraḥ pibet A, nitarām uttānagātraḥ pibed T, niyataṃ tenāgataṃ plāvayaty evaṃ $T_{vl}$, nitarām uttānapādaḥ pibed G*Y* **124d** yaḥ kurute ] G*Y*; yo vidhinā VA, yo vidadhe T • °cayo ] $G_P$*Y*; °jano $V^{pc}$A$G_BG_L$, °jino $V^{ac}$, °manā T **125a** ūrdhvajihvaḥ sthito bhūtvā ] V*H*; ūrdhvaṃ jihvā sthito bhūtvā A, ūrdhvajihvas tato bhūtvā T, ūrdhvajihvāṃ sthiraṃ kṛtvā $G_B$, ūrdhvaṃ jihvāṃ sthirāṃ kṛtvā $G_L$, ūrdhvāṃ jihvā sthirāṃ kṛtvā $G_P$, ūrdhvajihvaḥ sthiro bhūtvā $H_{vl}$ **126ab** = 111ab **127a** ūrdhva° ] VT; °mūla° G **127b** nava baddhāni tena hi ] T; navabandhānvitena hi V, tena vighnā vidāritāḥ $G_B$, tena vighno vidāritaḥ $G_L$, tena vighno nivāritaḥ $G_P$ **127c** muñcanty ] V; muṃcaty *cett.* **127d** tripathācandramākalāḥ ] V; ṣaṭ yathā candramākalā A, sa yathā pañcadhārakam T, sa panthāḥ pañcadhāraṇā $G_B$, sa yathā pañcadhāraṇā $G_LG_P$ **128a** cumbantī ] T*H*; cumbati VG, cumbatī A • lambikāgram aniśaṃ ] T$G_LG_P$*H*; luṃbigra*y*aniśaṃ V, laṃvikāśram aniśaṃ A, lambikāgram anilaṃ $G_B$ • rasaspandinī ] VTG$H_{vl}$; rasāsvādinī A, rasasyandinī *H* **128b** kaṭukātha ] T*H*; kaṭukāmla° VG$H_{vl}$ • dugdha° ] lona° $G_BG_L$ • °sadṛśā madhvājyatulyāthavā ] T$H_{vl}$; °sadṛśy amṛṣṭātha gaulyāthavā V *(unm.)*, °sadṛśā spṛṣṭvāś ca tulyāthavā A, °sadṛśī tiktāgatā cānyathā $G_BG_P$, °sadṛśī tiktāgatā vānyathā $G_L$, °sadṛśī madhvājyatulyā tathā *H*, °sadṛśī madhvājyatulyāthavā *H*, °sadṛśā madhvājyatulyā tathā $H_{vl}$ **128c** jarāpaharaṇaṃ ] V; jaropaśamanaṃ A, jarāntakaraṇaṃ T$G_P$*H*, jarāyaśamanaṃ $G_B$, jarāyaśyamanaṃ $G_L$ • śāstrāgamodīraṇaṃ ] VA*H*; śāstrāgamodgīraṇaṃ T$G_BG_L$$H_{vl}$, śāstrāgamoccāraṇaṃ $G_P$, śastrāgamoddhāraṇaṃ $H_{vl}$ **129c** retas tv ] V; reto A, tasya hy T, reto hy $T_{vl}$, reto py $G_BG_L$, rato py $G_P$ **130d** pīḍayet ] V; pīḍyate A$G_BG_L$$H_{vl}$, sarpati T*H*, vādhyate $G_P$ **131b** °vartīva ] V$G_BG_L$$H_{vl}$; °vartiṃ ca T*H*, °vartti ca $G_P$A, °vṛttiva $H_{vl}$

V = *Vivekamārtaṇḍa* Central Library Baroda 4110 • A = *Gorakṣayogāmṛta* Oriental Institute Baroda 28120 • G = *Gorakṣaśataka* ed. Fausta Nowotny, Köln 1976; $G_B$ = Bodleian Library 567 (Aufrecht); $G_L$ = Leipzig University ms 904; $G_P$ = BORI 313 (1895-98); $G_{Pk}$ = BORI 611 (1887-91) • T = 6-chapter *Vivekamārtaṇḍa* ed. Sāmbaśivaśāstrī, Trivandrum 1935; $T_{vl}$ = variant reading in T • *H* = *Haṭhapradīpikā* ed. Birch, Demoto, Hanneder, Liersch & Mallinson 2024; $H_{vl}$ = variant reading in *H* • *Y* = *Yogacintāmaṇi* of Śivānandasarasvatī, ed. Haridas Śarmā. Calcutta: Calcutta Oriental Press (no date) • *U* = *Dhyānabindūpaniṣad*, ed. A.N. Śāstrī in *The Yoga Upaniṣads*, Adyar Library 1920. **127** baddham ūrdhvabilaṃ yena tena vighnaṃ vidāritaṃ *added* T (cf. 127ab) • athā dhāraṇā *added* GP